# केरलपाठावलिः
# संस्कृतम्

## षष्ठी कक्ष्या

अक्कादमिक–संस्कृतविद्यालयानां कृते

# KERALA READER - SANSKRIT

## Standard VI

For Academic and Sanskrit Schools


GOVERNMENT OF KERALA
Department of Education
2009

# राष्ट्रगीतम्

जनगण मन अधिनायक जय हे,
भारत भाग्यविधाता।
पंजाब सिंध गुजरात मराठा,
द्राविड़ उत्कल बंगा।
विंध्य हिमाचल यमुना गंगा,
उच्छलजलधि तरंगा।
तव शुभ नामे जागे,
तव शुभ आशिष माँगे,
गाहे तव जय गाथा।
जनगण मंगलदायक जय हे,
भारत भाग्यविधाता।
जय हे जय हे जय हे
जय जय जय जय हे।

***Prepared by*** :
State Council of Educational
Research and Training (SCERT)
Poojappura, Thiruvananthapuram - 12, Kerala.
*Website* www.scertkerala.gov.in
*e-mail* scertkerala@asianetindia.com

© Government of Kerala • Department of Education • 2009

# भूमिका।

सर्वैः विदितमेवेदं सत्यं यत् पाठपुस्तकपरिष्करणप्रवृत्तिः अनुस्यूतं प्रचलिता वर्तते इति। गतवर्षे पञ्चम्याः तथा सप्तम्याश्च कक्ष्ययोः पाठ्यपुस्तके परिष्कृते। अस्मिन् वर्षे षष्ठ्याः, अष्टम्याः च कक्ष्ययोः पाठ्यपुस्तकपरिष्करणं कृतम्।

पञ्चम्याः कक्ष्यायाः पाठ्यक्रमम् अनुसृत्यैव तदुपरिस्थानां कक्ष्याणां पाठ्यपद्धतिः आसूत्रणीया। एकैकस्याः अपि कक्ष्यायाः विज्ञानस्तरस्य अनुयोज्यं हि पाठ्यपुस्तकनवीकरणं सम्पद्यते। तदात्वे एव तस्य सफलता भविष्यति।

प्रथमं पाठ्यभागः, ततः किं करणीयमिति शीर्षके पठनप्रवर्तनानि, अधिकविस्तरः, अनुबन्धः च आयोजितः। किमधिगतम्? इति स्वीयमूल्यनिर्णयपत्रिका अपि आयोजिता वर्तते। एकैकस्यापि एककस्य आमुखम् अध्यापकैरवधारणीयम्। शब्दकोशः, सिद्धरूपाणि, व्याकरणविशेषाः, प्रयोगविशेषाः इत्यादयः एकैकस्मिन्नेकके सन्ति।

एस्.सि.ई.आर्.टी संस्थायाः नेतृत्वे संघटितासु कर्मशालासु एव इमानि पुस्तकानि रचितानि। परिचयसम्पन्नानां विदुषां, महाविद्यालयाध्यापकानाम्, उच्चविद्यालयाध्यापकानां, जिल्लास्तरीयाध्यापकप्रशिक्षणकेन्द्रीयाणाम् अध्यापकानां परिचयप्राचुर्यमेव एषां पुस्तकानां निर्माणविजये कारणम्।

नवीकृतपाठ्यरीतीः स्वीकृत्य विद्यालयेषु पठनप्रवर्तनम् आसूत्रयितुं प्रवृत्तिपथमानेतुं च अध्यापकाः प्रयत्नं कुर्युः विद्यार्थिनः फलभागिनश्च भवेयुः इति आशास्ये।

भवदीयः

**प्रोफ. एम्.ए. खादर्**

अनन्तपुरी — निदेशकः

5.1.2009 — राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलाः।

# Textbook Development

**Kerala Reader, Standard VI - Sanskrit**

**Workshop participants**

Smt. Ambika Kumari. K

Sri. Aravindakshan. N

Smt. Girija.T

Smt. Lila. H.S

Dr. Mohandas.K

Sri. Pasupathinathan. P.A

Smt. Pushpavally. T.N

Sri. Radhakrishnan. R

Sri. Ramachandran. N.K

Sri. Santhoshkumar. T.K

Smt. Shiba. T.C

Dr. Suneethi Devi.T.D

Prof. Vasudevan Potti.R

**Artists**

Sri. Balakrishnan Achary. P.G

Sri. Rajeevan Parayil

Sri. Varghese Kalathil

**Experts**

Sri. Madhavan Pillai.V

Dr. Vasudevan.V.

Sri. Sreekantan Nair.D

**Academic Co-Ordinator**

Dr. Kerala Sreemathi.T

SCERT KERALA

**State Council of Educational Research and Training (SCERT)**

Vidyabhavan, Poojappura, Thiruvananthapuram - 695 012

# विषयानुक्रमणिका।


| क्रमसंख्या | | एककस्य/पाठस्य नाम | | पुटसंख्या |
|---|---|---|---|---|
| **एककम् - I** | | **स्वदेहं मा विस्मर।** | | 7 - 18 |
| | १. | **स्वस्थे शरीरे स्वस्थं मनः।** | उपन्यासः। | 8 |
| | २. | **तस्मात् स्नानं समाचरेत्।** | सुभाषितम्। | 12 |
| **एककम् - II** | | **जीवामृतम्।** | | 19 - 36 |
| | ३. | **हन्त अमृतमपि विषम्** | संभाषणम्। | 20 |
| | ४. | **जीवामृतम्।** | सुभाषितम्। | 25 |
| | ५. | **सुजला सूरजा।** | कथा। | 29 |
| **एककम् - III** | | **उद्यमः कार्यसाधकः।** | | 37 - 49 |
| | ६. | **केरलव्यासः।** | जीवनचरितम्। | 38 |
| | ७. | **वदतु भवान्।** | गानम्। | 41 |
| | ८. | **कर्म एव धर्मः।** | **चित्रकथा।** | 45 |
| **एककम् - IV** | | **महताम् एकरूपता।** | | 51 - 62 |
| | ९. | **अरक्षितं तिष्ठति दैवरक्षितम्।** | संभाषणम्। | 52 |
| | १०. | **स्नेहगीतम्।** | गीतम्। | 57 |
| | ११. | **अतिथिदेवो भव।** | कथा। | 59 |
| **एककम् - V** | | **संस्कृतिः संस्कृताश्रिता।** | | 63 - 80 |
| | १२. | **इष्टवरलाभः।** | काव्यम्। | 64 |
| | १३. | **बालरञ्जिनी।** | मासिकी। | 74 |
| | १४. | **हैमं दास्यामि कङ्कणम्।** | प्रहेलिकाः। | 77 |



एककम् - १

# स्वदेहं मा विस्मर।

जीवने आरोग्यस्य सुप्रधानं स्थानमस्ति। स्वास्थ्यसंरक्षणे भक्षणस्य कायिकाभ्यासस्य विनोदस्य शौचस्य च महनीयं स्थानम् अस्ति। एतान् विषयानधिकृत्य भारतीयानां चिन्ता कीदृशी आसीत् इति पश्यामः। एकके अस्मिन् एकः उपन्यासः त्रीणि सुभाषितानि च अन्तर्भवन्ति।

# १.स्वस्थे शरीरे स्वस्थं मनः।



“चिकित्सापेक्षया निरोधः वरम्” इत्यस्ति काचन प्रथा। प्राचीनाः शरीरसंरक्षणोपायानधिकृत्य ज्ञातवन्तः आसन्। भारतेषु प्रचलिता योगपद्धतिः रोगनिवारणार्थं चिकित्सार्थं च उपकरोति। योगाभ्यासाः मनसः शरीरस्य च स्वस्थतायै उपकारकाः भवन्ति। व्यक्तेः शुचित्वं बाह्यम् आन्तरं चेति द्विधा वर्तते। आन्तरशुचित्वविषये अत्यन्तं सहायको भवति योगाभ्यासः।

योगशास्त्रस्य प्रामाणिकग्रन्थः भवति पातञ्जलयोगसूत्रम्। पतञ्जलिमहर्षिः एव प्रथमतया योगाभ्यासान् क्रोडीकृत्य शास्त्ररूपेण समर्पितवान्। अतः योगशास्त्रस्य प्रणेता इति सः विख्यातः अभवत्।

“योगेन चित्तस्य पदेन वाचां
मलं शरीरस्य च वैद्यकेन।
योऽपाकरोत्तं प्रवरं मुनीनाम्
पतञ्जलिं प्राञ्जलिरानतोऽस्मि।।”





## किं करणीयम् ?



विद्यालये आयोज्यमानायाः आरोग्यसंरक्षणसंगोष्ठ्याः प्रचारणार्थं विज्ञप्तिपत्रं रचयतु।

**श्रद्धेयाः अंशाः।**

- मातृकास्वीकारः (उचितं शीर्षकं, सम्बोधनम्, विषयावतारणं, संघाटकस्य हस्ताक्षरम्, स्थलतिथिसूचनं, कार्यक्रमाः, समयः, वेदिकायाः नाम)।
- आकर्षकत्वम्।
- आशयपूर्णता व्यक्तता च।
- वाक्यघटना।



कायिकपरिशीलनस्य प्रयोजनं ज्ञातुं योगाचार्येण सह अभिमुखभाषणम् आयोजयतु; तदर्थं प्रश्नावलीनिर्माणं करोतु।
(प्रश्नवाचकशब्दाः - कः, किम्, कुत्र, कदा, केन, कथम्, किमर्थम्, कुतः......)

**श्रद्धेयाः अंशाः।**

- विषयसम्बन्धिनः प्रश्नाः।
- व्यक्तता।
- प्रश्नवाचकशब्दानाम् उचितोपयोगः।

**शब्दकोशः।**

| | | | |
|---|---|---|---|
| अधुना | इदानीम् | ഇപ്പോൾ | now |
| अनुशीलयन्ति | परिशीलयन्ति | പരിശീലിക്കുന്നു | train |
| उपज्ञाता | स्थापकः | ഉപജ്ഞാതാവ് | founder |
| बाह्यम् | बहिः भवम् | വെളിയിൽ ഉള്ളത് | external |
| मलम् | मालिन्यम् | മാലിന്യം | dirt, filth |

# 10

| | | | |
|---|---|---|---|
| यतन्ते | परिश्रमन्ते | പരിശ്രമിക്കുന്നു | try |
| निरोधः | निवारणम् | തടയൽ | prevention |
| वरम् | श्रेष्ठम् | ശ്രേഷ്ഠം | better |
| स्वस्थता | अरोगिता | സുഖാവസ്ഥ | comfort |
| प्रथा | प्रशस्तिः | പ്രസിദ്ധി | fame |
| आन्तरम् | आभ्यन्तरम् | ഉള്ളിലുള്ളത് | internal |
| काचन | काचित् | ഏതോ ഒരു | someone (F) |
| प्राचीनाः | पुरातनाः | പണ്ടുകാലത്തുള്ളവർ | ancestors |
| महनीयम् | महत् | മഹത്തായ | great |

**पदच्छेदः।**

| | | |
|---|---|---|
| स्थानमस्ति | - | स्थानम् + अस्ति। |
| विषयानधिकृत्य | - | विषयान् + अधिकृत्य। |
| इत्यस्ति | - | इति + अस्ति। |
| संरक्षणोपायानधिकृत्य | - | संरक्षणोपायान् + अधिकृत्य। |
| चेति | - | च + इति। |
| प्रयोजको भवति | - | प्रयोजकः + भवति। |
| योऽपाकरोत्तम् | - | यः + अपाकरोत् + तम्। |
| प्राञ्जलिरानतोऽस्मि | - | प्राञ्जलिः + आनतः + अस्मि। |

**विग्रहः।**

| | | |
|---|---|---|
| सुभाषितम् | - | शोभनं भाषितं सुभाषितम्। |
| शुचित्वम् | - | शुचेः भावः शुचित्वम्। |

## धातुरूपावलिः।

**अभवत् - भू सत्तायां लङ्. प. प. प्र. पु. ए. व.**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु. | अभवत् | अभवताम् | अभवन् |
| म.पु. | अभवः | अभवतम् | अभवत |
| उ.पु. | अभवम् | अभवाव | अभवाम |

**सन्ति - अस भुवि लट्. प. प. प्र. पु. ब. व.**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु. | अस्ति | स्तः | सन्ति |
| म.पु. | असि | स्थः | स्थ |
| उ.पु. | अस्मि | स्वः | स्मः |

**करोति - डु कृञ् करणे लट्. प. प. प्र. पु. ए. व.**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु. | करोति | कुरुतः | कुर्वन्ति |
| म.पु. | करोषि | कुरुथः | कुरुथ |
| उ.पु. | करोमि | कुर्वः | कुर्मः |

## शब्दरूपावलिः।

**अकारान्तः नपुंसकलिङ्गः जलशब्दः।**

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | जलम् | जले | जलानि |
| द्वितीया | जलम् | जले | जलानि |
| तृतीया | जलेन | जलाभ्यां | जलैः |
| चतुर्थी | जलाय | जलाभ्यां | जलेभ्यः |
| पञ्चमी | जलात् | जलाभ्यां | जलेभ्यः |
| षष्ठी | जलस्य | जलयोः | जलानाम् |
| सप्तमी | जले | जलयोः | जलेषु। |

*

# २.तस्मात् स्नानं समाचरेत्।



आरोग्यैश्वर्यसंवर्धनाय मानवाः स्नानम् आचरन्ति। स्नानस्य महत्त्वं अत्र प्रतिपादितं वर्तते।

**स्नानं नाम मनःप्रसादजननं दुःस्वप्नविध्वंसनं**
**शौचस्यायतनं मलापहरणं संवर्धनं तेजसः।**
**रूपद्योतकरं गदप्रशमनं कायाग्निसन्दीपनं**
**नारीणां च मनोहरं श्रमहरं स्नाने दशैते गुणाः।।**

**पदच्छेदः।**

| | | |
|---|---|---|
| शौचस्यायतनम् | - | शौचस्य + आयतनम्। |
| दशैते | - | दश + एते। |

**अन्वयः** स्नानं नाम मनःप्रसादजननं (भवति)। दुःस्वप्नविध्वंसनं, शौचस्यायतनं, मलापहरणं, तेजसः संवर्धनं च (भवति)। रूपद्योतकरं, गदप्रशमनं, कायाग्निसन्दीपनं, नारीणां मनोहरं श्रमहरं च। स्नाने एते दश गुणाः (सन्ति)।

**आशयः** स्नानं मनसः प्रसन्नतां जनयति। दुःस्वप्नान् विनाशयति। शुद्धीनां बीजं भवति। मालिन्यनिवारणं करोति। तेजसः संवर्धनं करोति। सौन्दर्यं वर्धयति। रोगाणुरूपरिपूणां नाशं करोति। जठराग्निम् उद्दीपयति। नारीणां मनसः आकर्षकं भवति। क्लमं दूरीकरोति। एवं स्नाने दश गुणाः सन्ति।

**नदीषु देवखातेषु**
**तटाकेषु सरस्सु च।**
**स्नानं समाचरेन्नित्यं**
**गर्तप्रस्रवणेषु च।।**

**पदच्छेदः।**

| | | |
|---|---|---|
| समाचरेन्नित्यम् | - | समाचरेत् + नित्यम्। |

**अन्वयः** नदीषु देवखातेषु तटाकेषु सरस्सु गर्तप्रस्रवणेषु च नित्यं स्नानं समाचरेत्।

**आशयः** नदीषु, देवालयवापीषु, तटाकेषु, सरस्सु, गर्तेषु, प्रस्रवणेषु वा नित्यं स्नानं करणीयम्। जलाशयस्नानात् शरीरं शैत्यसहिष्णुतां लभते।

**न स्नानमाचरेत् भुक्त्वा**
**नातुरो न महानिशि।**
**न वासोभिः सहाजस्रं**
**नाविज्ञाते जलाशये।।**

**पदच्छेदः।**

| | | |
|---|---|---|
| स्नानमाचरेत् | - | स्नानम् + आचरेत्। |
| नातुरः | - | न + आतुरः। |
| सहाजस्रम् | - | सह + अजस्रम्। |
| नाविज्ञाते | - | न + अविज्ञाते। |

**अन्वयः** भुक्त्वा स्नानं न आचरेत्। आतुरः स्नानं न आचरेत्। महानिशि स्नानं न आचरेत्। अजस्रं वासोभिः सह स्नानं नाचरेत्। अविज्ञाते जलाशये स्नानं नाचरेत्।



**आशयः** भोजनानन्तरं क्षिप्रमेव न स्नानमाचरेत्। एवञ्चेत् तत् दहनप्रक्रियां बाधेत। रोगिणः अपि स्नानं न आचरेयुः; रोगवर्धनभयात्। एवम् अर्धरात्रे स्नानं नाचरेत्, निद्राभङ्गात्। बहुवस्त्रधारणेन सह सदा स्नानं न कुर्यात्। अज्ञाते जलाशये गर्ताः भवेयुः इत्यस्मात् तत्रापि स्नानं नाचरेत्।

## किं करणीयम्?



सुभाषितानि तालानुसारम् आलपतु।

**श्रद्धेयाः अंशाः।**

- उचिततालस्वीकारः।
- उच्चारणस्पष्टता।



पद्यानि पठित्वा स्नानस्य महत्त्वप्रतिपादिकां खण्डिकां लिखतु।

**श्रद्धेयाः अंशाः।**

- आशयव्यक्तता।
- वाक्यघटना।
- विषयबन्धिता।



आरोग्यसंरक्षणप्रचारणे उद्घोषयितुं मुद्रावाक्यानि रचयतु।

**श्रद्धेयाः अंशाः।**

- संक्षिप्तता।
- आशयव्यक्तता।
- विषयबन्धिता।

चित्राणि निरीक्ष्य एतानि प्रवर्तनानि आरोग्यसंरक्षणे कथम् उपकुर्वन्ति इति लिखतु।

**श्रद्धेयाः अंशाः।**

- विषयबन्धिता।
- उचितपदस्वीकारः।
- वाक्यघटना।










16



# अनुबन्धः ।

## शब्दकोशः ।

| | | | |
|---|---|---|---|
| अजस्रम् | निरन्तरम्, सदा | എപ്പോഴും | incessantly |
| अविज्ञाते | अज्ञाते | അറിയപ്പെടാത്ത | unknown |
| आतुरः | रुग्णः | രോഗി | Ailing |
| आयतनम् | बीजम्, आधारः | അടിസ്ഥാനം | foundation |
| देवखातेषु | देवैः निर्मितेषु | ദേവഖനിതങ്ങളായ (പ്രകൃത്യാ ഉണ്ടായ ജലാശയങ്ങളിൽ) | in the natural reservoirs |
| गदप्रशमनम् | रोगशमनम् | രോഗത്തെ ഇല്ലാതാക്കുന്നത് | curative |
| द्योतकः | प्रकाशकः | പ്രകാശിപ്പിക്കുന്നത് | illuminating |
| निशि | रात्रौ | രാത്രിയിൽ | at night |
| गर्तप्रस्रवणेषु | उत्सेषु | ഊറ്റുകുഴികളിൽ | in the springs |
| प्रसादः | सन्तोषः | സന്തോഷം | happiness |
| महानिशि | अर्धरात्रे | അർദ്ധരാത്രിയിൽ | at mid-night |
| रूपम् | सौन्दर्यम् | അഴക് | beauty |
| वासोभिः | वस्त्रैः | വസ്ത്രങ്ങളോടുകൂടി | wearing the usual dresses |
| विध्वंसः | विनाशः | വിനാശം | destruction |
| शौचम् | शुचित्वम् | ശുചിത്വം | cleanliness |
| सन्दीपनं | उद्दीपनम् | ഉദ്ദീപിപ്പിക്കുന്നത് | awakening |
| सरः | कमलिनी | പൊയ്ക | lake |
| स्वास्थ्यम् | अरोगावस्था | ആരോഗ്യം | health |
| श्रमहरम् | क्लमहरम् | ക്ഷീണത്തെ ഇല്ലാതാക്കുന്ന | makes energetic |
| हरति | आकर्षति | ആകർഷിക്കുന്നു | attracts |
| | अपनयति | ഇല്ലാതാക്കുന്നു | avoids |

**विग्रहः।**

स्मृतिः - स्मर्यते वेदधर्मः अनया इति।

नदी - "नदति" शब्दायते इति।

**शब्दरूपावलिः।**

**ईकारान्तः स्त्रीलिङ्गः नदीशब्दः।**

| | | | |
|---|---|---|---|
| प्र. | नदी | नद्यौ | नद्यः |
| सं. प्र. | हे नदि | हे नद्यौ | हे नद्यः |
| द्वि. | नदीं | नद्यौ | नदीः |
| तृ. | नद्या | नदीभ्यां | नदीभिः |
| च. | नद्यै | नदीभ्यां | नदीभ्यः |
| प. | नद्याः | नदीभ्यां | नदीभ्यः |
| ष. | नद्याः | नद्योः | नदीनाम् |
| स. | नद्यां | नद्योः | नदीषु। |

**अमरकोशः।**

**नदी**

खेयं तु परिखाधारस्त्वम्भसां यत्र धारणम्।
स्यादालावालमावालमावापोऽथ नदी सरित्।।

तरङ्गिणी शैवलिनी तटिनी ह्रदिनी धुनी।
स्रोतस्विनी द्वीपवती स्रवन्ती निम्नगाऽपगा।।

**मनः**

चित्तं तु चेतो हृदयम्
स्वान्तं हृन्मानसं मनः।।

# 18

## किमार्जितम् ?

**निर्देशाः**

| | | |
|---|---|---|
| | | |
| | | |

1. विज्ञप्तिपत्रं निर्मितं चेत् मञ्जूषायाः प्रथमखण्डे ‘स्नानात्’ इति पदं लिख्यताम्।
2. प्रश्नावली कृता चेत् द्वितीयखण्डे ‘जायते’ इति पदं लिख्यताम्।
3. तालक्रमानुसारं सुभाषितानि आलपितानि चेत् ‘सौख्यं’ इति पदं तृतीयखण्डे लिख्यताम्।
4. खण्डिका लिखिता चेत् चतुर्थखण्डे ‘स्वास्थ्यं’ इति पदं लिख्यताम्।
5. मुद्रावाक्यं रचितं चेत् पञ्चमखण्डे ‘तेजो’ इति पदं लिख्यताम्।
6. चित्राणि विलोक्य आरोग्यसंरक्षणाय प्रवर्तनान्येतानि कथमुपकुर्वन्ति इति लिखितं चेत् षष्ठखण्डे ‘बलं तथा’ इति लिख्यताम्।

✱